Shri Raghunatha Temple MSS. Library,
JAMMU

No. ६३३ - घ

Title सांख्यतत्त्व कौमुदीटीका

Author भारतीपति;

Extent ७ Age १८६७

Subject सांख्यशास्त्रम् · सम्पूर्णम्

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नं० ६३३-घ

सांख्यतत्त्वकौमुदी टीका (सांख्यशास्त्रम्)

नं० ५३३-घ

पत्राणि ८ (सम्पूर्णम्)

पत्रे ८

कर्त्ता भारतीपतिः

संवत् १८६६

लिपिक ; गुसानीराम ,

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नं० ६३३-घ

सांख्यतत्त्वकौमुदी टीका (सांख्यशास्त्रम्)

पत्राणि ८ (सम्पूर्णम्)

कर्त्ता भारतीपति:

संवत् १८६६

लिपिक: गुमानीराम:

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नं० ५३२५

सांख्यतत्वकौमुदीटीका·१·२७

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

त॰ कौ॰
१

ॐ नमः शिवाय ॐ श्रीविघ्नध्वंसकाय नमः श्रीवागीश्वर्यै नमः श्रीरामचंद्राय नमः श्रीगुरुभ्यो नमः श्रीगंगाधराय नमः
श्रीभानवे नमः श्रीवेदव्यासाय नमः श्रीसर्वदेवेभ्यो नमः श्रीविश्वरूपाय नमः यत्प्रसादादहं नित्यमात्मानमशरीरि-
णं विजज्ञौ तान्गुरून्भक्त्या नमस्यामि करुणाकरान् १ सांख्यसप्ततिं व्याचिख्यासुराचार्यवाचस्पतिमिश्रः प्रारीप्सितग्रंथ-
स्य निःप्रत्यूहपरिसमाप्तिप्रचयगमनाय शिष्टाचारपरिपालनाय च प्रधानस्य पुंभोगापवर्गार्थे प्रवृत्तिलक्षणं शाश्वता-
तर्पंकियया प्रकृतिपुरुषौ नमस्यति अजामेकामिति न जायत इत्यजा मूलप्रकृतिः तां नमाम इत्यन्वयः ननु तस्याः
सद्भावे प्रमाणाभावान्निर्विषयत्वेन नमस्कारस्य व्यर्थत्वात इत्यत आह बह्वीः प्रजाः सृजमानामिति विमताः प्रजाः सुखदुःखमोहात्म-
ककारणपूर्विकास्तदन्वितत्वात् यदित्थं तत्तथा यथा मृदन्वितं घटादि मृत्कारणपूर्वकं तथा चैताः प्रजास्तस्मात्तथेति प्रकृ- सुखदुःखमोहात्मकका-
तिसिद्धेर्न निर्विषयत्वं नमस्कारस्येति भावः ननु कार्याणामनेकत्वात्कारणानेकत्वमित्याशंक्याह एकामिति नन्वेकस्याः प्रकृतेः रणपूर्विका इत्यर्थः
साधनसामग्रीव्यतिरेकेण विचित्रजगन्निर्माणकर्तृत्वं न संभवतीत्याशंक्याह लोहितेति लोहितकृष्णशुक्लशब्दैः रज- १
स्तमःसत्त्वानि गुणास्तेऽभिधीयन्ते रंजनात्मकत्वाल्लोहितं रजः आवरणात्मकत्वात्कृष्णं तमः प्रकाशकात्मकत्वात् शु-
क्लं सत्त्वं तेषां गुणानां साम्यावस्था अवयवधर्मैरुपदिश्यते लोहितकृष्णशुक्लामिति एकस्या अपि त्रिगुणत्वेन विचित्राद्विचित्र-
कार्यकर्तृत्वमित्यर्थः प्रधानं नमस्कृत्य पुंभोगापवर्गाय प्रवर्तते तान्पुरुषान्नमस्करोति अजा इति जुषमाणामिति
सेवमानां प्रीयमाणां वा भोगं साधयंतीमिति यावत् भजंत इति सेवंते तामेवाधिष्ठायात्मत्वेनोपगम्य वपुःसुखिनो दुःखि १

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नोमूढा इत्यविवेकतया संसरंतीत्यर्थः ननु प्रकृतिं भोगसाधयंती चेत्सुरूपाः सेवंते तर्हि तेषां विषयिणां विविक्तानंतभोग
भोगिनां वैराग्याभावात् निर्मोक्षः इति चेत्तत्राह जहत्येनामिति अतएवोत्पन्नविवेकज्ञाना सन्तोपि कृतभोगां कृतभोगां प
रित्यजंति १ प्रकृतिं पुरुषांश्च नत्वाधुना विद्याप्राप्त्यावंतरंगसाधनत्वज्ञापनाय तत्त्वसंप्रदायप्रवर्तकानाचार्यान् प्रण
मति कपिलायेत्यादिना अहमो अभिवादये इति शास्त्रोक्तन्यायादेते इति स्वज्ञापनं एतत्पदोत्तरं वयमिति शेषः नमः
स्याम इत्युत्तमपुरुषप्रयोगात् आसुरेः शिष्यः पंचशिखस्तच्छिष्यः ईश्वरकृष्ण इति यस्यग्रंथस्य व्याचिख्यासामहिद्रूप
विघ्नोपशमादिसमर्थं शिष्टाचारप्रमाणकं देवतागुरुनमस्कारलक्षणं मंगलमाचरित विना विषयसंबंधौ तथैवा
र्थाधिकारिणो अव्याख्येयोभवेद्ग्रंथः स्याद्ग्रंथ तच्चतुष्टयमिति स्मरणात् विषयसंबंधप्रयोजनाधिकारिभावनिमित्तां
तस्य ग्रंथस्यानारभ्यशंकां वा वर्तयति इहखल्वित्यादिना इह शास्त्रे खलु निश्चयेन जिज्ञासितमर्थं ज्ञापयन्नुपदेष्टा
आदर्तव्यवचनो बुद्धिमतां भवतीति अभाणि विपश्चिदं डमाह अप्रतिपित्सितं त्विति ननु पंचविंशतितत्त्ववेदो व्यवहारातीत
न ४ तत्वादलौकिकत्वं मंडनमेवेति चेत्तत्राह नापित्सितं तु कश्चिदिति ननु तर्हि जिज्ञासिताजिज्ञासितार्थज्ञाने कृत उपदेष्टु पु ४
नजिज्ञासितमेवोपदेष्टव्यमितिनान्यदिति चेत्तत्राह सर्वेषामिति बुद्धिमतामित्यर्थः प्रारब्धुमिष्टस्य शास्त्रस्य विषयो
व्यक्ताव्यक्तलक्षणस्तज्ज्ञानस्य परमपुरुषार्थसाधनत्वं यस्तदेवहेतुर्यस्याः साताप्रारीप्सितशास्त्रविषयज्ञानस्य
साधनत्वमस्तोशास्त्रविषयसंबंधिनीमनुभवफलपर्यंतां ज्ञातुमिच्छामित्यर्थः ननु शास्त्रविषयविज्ञानेनार्थोसि

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

जिहासितं स्यात् ॥ २ ॥ शक्यसमुच्छेद इति तृतीयः दुःखस्य नित्यत्वे तदुच्छेदोपायापरिज्ञानत्व इति तृतीयविकल्पावांतरविभागद्वयं ॥१॥

त॰कौ॰ २

दुःखाभावात् किं तज्जिज्ञासयेत्याशंक्य व्यतिरेकमुखेन तृतीयविकल्पावांतरविभागसहितविकल्पपंचकद्वारा विषयस्य
प्रयोजनवत्त्वेन जिज्ञासां समर्थयते एवं हीत्यादिना दुःखत्रयं व्याख्याय इदानीमभिघातं व्याकरोति॰ तदभिघातेनेति प्रति
कूलतयानिष्ठतयेत्यर्थः ननु दुःखस्य नित्यरजःस्वरूपत्वेन नित्यत्वाद्विनाशः कर्त्तुं न शक्यत इति चेत्तत्राह यद्यपि चेति
सन्नितं दुःखं यद्यपि न विनश्यते तथाप्युपायेन तदीयाभिभवः कर्त्तुं शक्यत इति ज्ञानेन चापवर्ग इत्यत्र कथायथ्यात
इति द्वेधापि शक्यसमुच्छेदस्ता नास्तीत्युक्तं फलितमर्थमाह तथापीति ननूपसर्जनं पूर्वमिति पाणिनिस्मरणात् दुःखत्रया
भिघातादित्यत्राभिघातपदस्य प्राधान्यं दुःखत्रयपदस्योपसर्जनीभावस्तत्र तदुच्छेदेनाभिघातेऽगृहीते तदुच्छेदेन दुःखत्रयग्रह
णां कथमित्याशंक्य दुःखत्रयग्रहणे तदभिघातग्रहणं पारमार्थिकमित्यभिप्रेत्याह उपसर्जनस्यापीति गुणस्तस्य तद
ति तदुच्छेदेन शास्त्राविषयत्वानुपायत्वलक्षणं विषयजिज्ञासामवतारे हेतुमतुर्थोपि विकल्पो नास्तीत्याह अपघातकमि
ति ननु यद्यपि हि दृष्टस्य सोकामिमितरस्यादिदुष्करत्वं तथापि शास्त्रीयत्वेन सम्यग्ज्ञानत्वमिस एवादतव्य इति चेत्तत्राह तथा
चेति श्रेष्ठस्य मीपे गृहकोणे प्राङ्गणे वा ईषत्करा अल्पव्ययत्वसाध्याः सुकरा इत्यर्थः सुकरोपायीति पंचमोपि विकल्पैर्नघ
टत इत्यर्थः ननु शास्त्रारंभे मंगलस्यैव कीर्त्तनमेव युक्तं न त्वमंगलदुःखोच्चारणमित्याशंक्याह यद्यपि चेति २ स्वर्गस्य
दुःखविरोधी स्वसत्तया समूलघातं दुःखमपहंतीत्युत्तरेणान्वयः उक्तोर्थे भट्टवार्त्तिकं प्रमाणयति यन्न दुःखेनेति ननु स्व
तावत्तराच्छ्रवणात् अत्र यशब्दश्रवणाभावादत स्मृतिवचनाद यत्तं वैदिकोपायसाध्यस्य स्वर्गस्यानैसत्यतीत्याशं

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

कारूपत्वमंतरेणाश्च तत्त्वश्रुत्यन्यथानुपपत्तेः श्रुतार्थापत्तिः सिद्धमन्यत्वमित्याह तद्वयइति नन्वानुश्रविकइतिसाधा
रणवादेन तत्त्वज्ञानस्यापिग्रहीतुंशक्यत्वात्तस्यानुपायत्वंप्राप्नोतीत्याशंक्याह इहसाध्यश्रवणबलेनकर्मकलापस्यग्रहणमि
त्याह यद्यपिचानुश्रविकइति स्वल्पःसंकरोहिंसादिजन्योऽस्येतिस्वल्पसंकरो विशुद्धिरस्त्यर्थः सपरिहारः सप्रत्यवम
र्षेणअभिभवेन वर्त्ततेसप्रत्यवमर्षः सातिशयः हीनसंपदधिकसंपदाभिभूयतइति यावत् ननुनिमित्तांतरादप्रवृत्ताप्राप्तवि
षयोहिविधिःप्रतिप्रसव उच्यते तद्यथा ज्वरातस्याविशेषेणान्नपाननिषेधस्यऔषधंपिबेदितिप्रतिप्रसवेनबा
धः तथानहिंस्यादितिनिषेधस्योत्सर्गवादस्याग्नीषोमीयंपशुमालभेतेत्यनेनापवादेनबाधःस्यादित्यविशुद्धत्वेनन्योति
ष्टोमादेरितिचेत्तत्राह नचेति तत्रापितर्हिविरोधोस्त्विति चेत्तत्राह नचास्तीति ननुसेहेभिन्नविषयत्वेविरोधाभावेनबा
ध्यबाधकभावाभावस्तन्मात्रेनास्तीतिकृत्वासनस्यादित्याशंक्याह नहिंस्यादितीति नहिंस्यादितिवाक्यस्यहिंसानर्थ
त्व ९ कारणमितिविषयोनक्रत्वर्थत्वमपितुक्रत्वर्थत्वंअग्नीषोमीयपश्वालंभनवाक्यस्यक्रतूपकारोविषयइतिभिन्नविषयत्व
मविरोधेकारणमन्यथापि इदानीमनयोर्विषयपारापिविरोधोनास्तियद्धिरोधनिबंधनःशास्त्रयोर्विरोधःस्यादित्याह
नचेति क्रतूपकारकत्वमनर्थहेतुत्वेननविरुध्यतइत्युक्तं तत्रहेतुमाह हिंसाहीति सापञ्चापीहिंसानर्थत्वात् पुरुषस्या हिंसा
धर्मंसंपादयिष्यतिशास्त्रोक्तत्वाच्चयज्ञोपकारंकरिष्यतीत्यनर्थहेतुत्वक्रतूपकारकत्वयोरेकपश्वालंभनवाक्यार्थत्वे
नविरोधाभावात् क्रतूपकारकत्वेनानर्थहेतुत्वंनबाध्यतइत्यविशुद्धत्वमेवस्यात्याग्नीषोमादेरितिस्थितं नन्वस्त्वविशुद्धत्वंहिंसायुक्तत्वात्पा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

कौ० टी०
२
3

क्षयातिशयसंबंधाभावात् २

गादेरूपायस्योपेयस्वर्गादिसंबंधित्वे तु क्षयातिशयौ कथं तत्संबंधित्वे उपचारस्ताविति आशंक्य कार्यकारणयोरभेदोपचारादित्याह दृ
यातिशयौ चेति ननु स्वर्गस्यानित्यनिरतिशयफलत्वेन तत्संबंधाभावान्न कारणे उपचारः तथा हि इत्याशंक्यानुमानागमाभ्यामुभौ सा
धयति क्षयित्वं चेत्यादिना विमतं स्वर्गादि अनित्यं वस्तुत्वे सति कृतकत्वात् संप्रतिपन्नवदित्यर्थः ननु स्वर्गिभिः स्वकर्मानुसारेण ^
सुखमेव भुज्यते अतोऽतिशययुक्तत्वं न दोषायेति चेत् तत्राह परसंपदुत्कर्ष इति यावत्तुल्यत्वसाधिका श्रुतिस्मृतिर्दर्शिता सा
चिरावस्थायित्वोपलक्षणेत्याह अपामेति कर्मोपार्जितस्य लोकस्य क्षयित्वे तद्यथेह कर्मजितो लोकः क्षीयत एवमेवामुत्र पुण्य
जितो लोकः क्षीयत इत्यादिश्रुतिविरोधः स्यादित्यर्थः ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्तीत्यादिभ्य
वतो कृत्वा क्वचिद्विरोधोऽपि यत एव कर्मणाऽमृतत्वमापेक्षिकमत एव श्रुतिरित्यर्थः कर्मणा ज्योतिष्टोमादिना प्रजया पुत्रेण धने
न देवताज्ञानेन दैवेन वित्तेन पुत्रेण तृतीयो लोको जय्यो विद्यया देवलोकः कर्मणा पितृलोकः इति श्रुत्यन्तरात् कर्मादिभिः पितृदेव
मनुष्यलोकान् प्राप्नुयुः अमृतत्वं न प्राप्नुयुः धनेनेत्यत्रापि न केवलं संबध्यते तर्हि कथममृतत्वं प्राप्नुयुरित्याशंक्याह त्यागेनैकेति सर्व
कर्मसंन्याससाध्यज्ञानेन विमला महात्मानः प्राप्नुवन्त इत्यर्थः तदमृतत्वं स्वर्ग एवेति चेत् तत्राह परेण नाकमिति तर्हि दूरत्वा
न्न प्राप्यमिति चेत् तत्राह निहितं गुहायामिति बुद्धौ तर्हि तस्य व्यासक्तत्वात् यज्ञैरपि लभ्यमिति चेत् तत्राह यद्यतय इति अदूर
म् तं यतीनां विवेकिनां अविवेकिनां दुरस्तमेतत् प्रकृतिपुरुषविवेकज्ञानं दुःखोपघातकारणं नित्यफलमित्यभिधायापि तन्ना
पपद्यते दुःखत्रयाभिभवलक्षणस्य दुःखत्रयध्वंसस्य कृतकत्वेनानित्यत्वात् तथा च प्रयोगः विमतो दुःखध्वंसोऽनित्यः कृत
कत्वात् यदेवं तदेवं यथा स्वर्गादि तथा चायं तस्मात्तथेति चेत् तत्राह न च कार्यत्वेनानित्यतेति न च कार्यत्वेनानित्यतेऽस्ना प्रव चनमा ३

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

त्वं प्रमाणं भवतीति अनेनानुमानस्य निर्दुष्टत्वादित्याशंक्य कार्यत्वे भावत्वमुपाधिरित्याह भावस्येति न च साधनव्यापकत्वमि
क॰२ त्याह दुःखप्रध्वंसस्येति ननु प्रध्वंसस्य नित्यत्वे पुनर्दुःखजातमुत्पत्स्यत इति चेत्तत्राह न चेति तत्र हेतुः कारणेति दुःखकारणं
पुंप्रकृत्योरविवेकः नन्वविवेकस्यानादिकालप्रवृत्तत्वात् प्रवृत्तिरनुपपन्नेत्याशंक्याह विवेकेति उपजननमुत्पत्तिः उपरिष्टा
दिति दुःखाभावे तूपपत्तिकस्य अत्र सत्त्वशब्देन सत्त्वरजस्तमसां साम्यावस्था प्रकृतिरुच्यते अत एव हिंसादिमूलादतो विपरीतोऽ
त एव द्विवचनविभक्त्योपपदेतरवाप्ससुनाविति पाणिनीयसूत्रेण मुत्पत्तिमाह अत्रानुश्रविकोऽहीत्यादिना ननु श्रेयस्यानुसारेण
ज्ञाव्यक्ताव्यक्तज्ञानादिति क्रमेणोल्लिखितः कार्येति चेत्तत्राह व्यक्तज्ञानेति पंचविंशतितत्त्वानां श्रवणमनननिदिध्यासनैः प्रधानम
हदहंकारतन्मात्रेन्द्रियप्रवृत्तिभ्योऽन्योऽहं पुरुष इति साक्षात्कारो भवतीति फलितमाह इतदुक्तमित्यादिना बहुकालनैरंतर्य
ादरातिशयेन च सेवनात्संस्कारस्यात् ज्ञानादस्योत्पत्तिरित्यर्थः उक्तार्यायाः पर्यवसितं प्रदर्शयन् तदुत्तरार्यायाः संगतिमा
ह शास्त्रारंभं समाधायेति सिद्धान्तीत्यस्य अयमर्थः व्यक्ताव्यक्तज्ञलक्षणो विषय इति विषयशास्त्रयोः प्रतिपाद्यप्रतिपादक
भावलक्षणः संबंधः कैवल्यं प्रयोजनं दृष्टानुश्रविकविषयविरक्तोऽधिकारीति प्रकर्षेणाधीयते स्थाप्यते अत्राखिलमिति प्रधा
नं अनवस्था प्रसक्तेरस्य कारणं नास्तीत्यभाणि नन्वस्त्वनवस्था किं नो बाध्यते इति चेत्तत्राह न चेति एतदुक्तं भवति यत्त्वया प्रधा
नस्य कारणं कल्प्यते तस्य प्रधानार्थत्वे कश्चिद्विशेषो नांगीक्रियते वा प्रथमे कल्पे न कारणत्वं तस्यातिशयाभावात् नह्यतिशया
भावे प्रकृतिविकारभावः संभवति अथ च तन्नत्व निर्गुणत्वादिलक्षणो विशेषः स्यादिति द्वितीयः कल्पः तथापि न कारणत्वं अ
विक्रियत्वात् शक्तिरूपः स्यादिति चेत् या युष्माकीणा शक्तिस्तदेवास्माकीनं प्रधानमिति संज्ञामात्रे विवाद इति एकस्य प्रधान

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

कौ॰ सां॰ टी॰
४
५

कारणस्यासिद्धेः सर्वासिद्धिर्नेनानवस्थायां प्रमाणमिति भिन्नक्रमइति भिन्नोऽन्यः क्रमो निवेशस्यान्वयस्य तथा॰ विकारशब्दस्याग्रेऽध्य
र्थः ननु षोडशको गणो विकार एव न प्रकृतिरित्यवधारणं न घटते तदंतःपतितानां पृथिव्यादीनां शरीरगोघटवृक्षादीन् प्रति
प्रकृतित्वादिति चेत्तत्राह यद्यपि चेति ननु मा भूज्जीवीजानां पृथिव्यादिस्तत्त्वांतरत्वं तथापि गवाद्यादिजनकतेन च भूतानां प्र
कृतित्वमित्याशंक्याह तत्त्वांतरेति विमता गोघटादयः पृथिव्यादिभ्यस्तत्त्वांतरं न भवंति स्थूलत्वादिंद्रियग्राह्यत्वाच्च प्रसिद्धपृ
थिव्यादिवत् व्यतिरेके पुरुषवदिति तत्त्वांतरत्वाभावे प्रमाणमाह सर्वत्रामिति ऽपरीक्षद्विति प्रकृतेर्महानित्यारंभेत्यर्थः ३॥
उत्तरार्थाद्वयप्रतिपाद्यमर्थमाह तमिममिति तत्रापि समनंतरार्थार्थं प्रथममाह॰ न चेति नन्वत्र प्रमाणमिति संज्ञालक्षपदमस्ति
ननु लक्षणपदमित्याशंक्याह तन्निर्वचनमिति सम्यगनुभवः प्रमेति प्रमाया लक्षणं सूचय   माह॰ असंदिग्धेत्यादिना असं
संदिग्धोऽबाधितोऽनधिगतो विषयो यस्य असौ चित्तवृत्तिर्बोधः पौरुषेयः फलं प्रमेत्यर्थः विशेषणानां यथासंख्यं व्यावर्त्यमाह
संशयेति लक्षणे विशेषणप्रक्षेपेण लक्ष्यं व्यावर्त्यमित्यपि एवं त्वेमेव विशेषणानामित्यर्थः नन्वृषि विज्ञानमपि प्रमाणत्वेनो
ररीकृतं चतुर्थं किमिति नोच्यत इत्याशंक्यापरिहरति एतच्चेति त्रैविध्यमित्यर्थः तस्यैव लौकिकप्रमाणस्येत्यर्थः पाठक्रमेणोध
आर्यार्थमुद्दित एव कथं न व्याख्यायते इत्यत आह सेयमिति आकांक्षायोग्यतासंनिधिवशेन पदानामन्वये सत्यर्थबोधकत्वेना
न्वेयत्यर्थः आकांक्षायोग्यतासंनिधानं चेतित्रयं संबंधकारणत्वेन ज्ञेयं तेनानंतरं नत्वाप्तश्रुतिरिति ४ प्रत्यक्षस्य प्राथम्यकार
णद्वयमाह प्रत्यक्षस्येत्यादिना प्रत्यक्षलक्षणस्य प्रयोजनकथनेनैव लक्षणमप्याह समानेति समानासमानजातीयव्यवच्छे ४

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

दकं लक्षणमिति हि लक्षणं समानजातीयव्यवच्छेदकं लक्षणमित्युक्ते विशेषणेऽतिव्याप्तिः स्यात्तदुदासायाह समानेति समान
जातीयग्रहणेनैवादि सामान्यविशेषनिराशार्थं ऊर्ध्वस्रोतसां देवानां नन्विंद्रियस्य पूर्वस्थानत्यागव्यतिरेकेणान्यत्रवृत्त्यन्
यानुपपत्तेः रांध्रवाधिर्यादिप्रसंगः सर्वेषामित्याशंक्याथापत्तेरन्यथानुपपत्तिमाह वृत्तिश्चेति नन्वध्यवसायो बुद्धिवृत्तिर्वा
बुद्धिधर्मो नेंद्रियधर्म इत्याशंक्याह तदाश्रितेति अध्यवसायस्य स्वरूपोऽनुपदर्शयति अध्यवसायश्चेत्यादिना उपलक्षं
प्रमाणं निगमयति इदं त्विति एतत्कृत्यमाह अनेनेति ननु अनाधेयातिशयस्य पुरुषस्य चेतनस्याचेतनप्रमाणकृतः कीदृ
शोऽनुग्रह इत्याशंक्य परिहरति बुद्धिसत्त्वं हीत्यादिना तच्छायापत्त्या बुद्धिसादृश्यप्राप्त्या ज्ञानसुखादिमानित्युपलक्षणं बुद्धेर
जस्तमसोः समुद्रेकः दुःखमोहादिमानि वश्यवतीत्येतदपि प्रत्येकं विशेषणस्य व्यवच्छेद्यमाह तत्रेत्यादिना ननु निश्चयपदप्रक्षे
पेण निश्चयरूपसंशयस्य व्यावृत्तियुक्ता न त्वध्यवसायपदप्रक्षेपेणेत्यत आह निश्चय इति यस्माद्विशेषणेनैवालक्ष्यव्यावृत्ति
स्तदित्युपसंहारः ननु नैयायिकादीनामन्येषां दर्शननिकानां सम्यगपरोक्षानुभवसाधनं प्रत्यक्षमित्यादीनि प्रत्यक्षस्य वहू
नि लक्षणानि संत्येतदेव सम्यक् लक्षणमित्यनुचितं न च इत्याशंक्य परिहरति लक्षणांतराणि चेति एवं प्रत्यक्षं लक्षयित्वानु
मानं लिलक्षयिषुः प्रत्यक्षैकप्रमाणवादिनं चार्वाकं सम्यगर्थकथनप्रमाणान्तरे तोपजीव्यत्वादनुमानमुररीकारयति नानु
मानमित्यादिना नन्वनिमिते लौवप्रत्यक्षेण पुरुषस्याज्ञानादीन् ज्ञात्वाऽज्ञं संदिग्धं विपर्यस्तं चार्वाकः सम्यगर्थकथनेन बोध
यिष्यतीति कथमिवानुपपत्तिरित्याशंक्य परिहरति न चेति पुरुषांतरगता इति हेतुगर्भं विशेषणमज्ञानादीनां अर्वाग्दृशेत
ति अर्वाग्दृशे वीद्य ग्राह्यत्वाप्रत्यक्षस्यांतःकरणवृत्तित्वात् ज्ञानादीनां ग्राह्यग्राहकभावश्चेन्न घटते तर्हि माघटिष्ट पु

स्या ६

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

मी॰ कौ॰ टी॰ हृषस्याज्ञानादीनज्ञात्वैव वोधाय प्रवर्तिष्यत इत्याशंक्याह अनवद्येति अनवद्यता अज्ञाताज्ञानसंदेहविपर्यया यस्य तं य
५ स्मात्स्वतेहेण ज्ञानादीनां प्रतिपत्तिर्न संभवति तस्मात्तत्प्रतिपत्त्यर्थमनुमानमनिच्छताप्यनिच्छमतिनांगीकर्तव्यमित्युपसंहरति त
5 स्मेनेति विमतमेतद्वचनं एतदंतःकरणस्याज्ञानानिमित्तं भवितुमर्हति बुद्धिपूर्वकत्वे सति असंबद्धवचनत्वात् मदीयासंबद्धवच
नवत् विमतमेतद्वचनमेतदंतःकरणस्य विपर्यासनिमित्तं बुद्धिपूर्वकत्वे सति मिथ्यानिश्चितवचनत्वात् संप्रतिपन्नवदिति अनुमा
तव्या अनुमानसाध्या इत्यर्थः प्रत्यक्षानुमानयोरनंतर्यं कथमूणमहः॰ तत्प्रत्यक्षकार्यत्वादिति तत्रैलोकायतिकेनानुमानां
गीकर्तव्यमसतीत्यर्थः अवांतरसंगतिमाह तत्रापीति प्रतिबद्धव्याप्यमित्युक्ते विनाभावेऽप्रतिव्याप्तिः स्यात्तद्व्युदासार्थमाह स्वभा
वेति स्वभावोऽविनाभावभूतस्तेनेत्यर्थः स्वभावप्रतिबद्धत्वं व्याप्यमित्युक्ते विमतं दानिकं सत्वादित्यत्र सत्त्वं स्वभावप्रतिबद्धमास्तिं॰
यज्ञेपशुहिंसा अधर्मजनिका हिंसात्वाद्ब्रह्मणहिंसावदित्यत्र हिंसात्वस्वभावप्रतिबद्धमस्तितद्व्याप्त्यर्थं शङ्कितेत्यादि अत्र हि प्रथमे
नुमाने शंकितोपाधिर्द्वितीये समारोपितोपाधिर्विद्यते शंकितः समारोपितश्च शंकितसमारोपितौ तावुपाधी चेति तत्थ्यातया
निराकरणं तेन यस्मिन्ननुमाने स्वपक्षबाधकस्तर्को नास्ति तत्र यः शंक्यमान उपाधिः स शंकितोपाधिर्यत्र त्वयमुपाधिरिति
समारोप्यते यथा निषिद्धत्वं स आरोपितः तल्लक्षणं तु साधनाव्यापकत्वे सति साध्यसमव्याप्तिरूपाधिरिति तदुक्तमुदयनेन।
एकसाध्याविनाभावे मिथः संबंधशून्ययोः साध्याभावाविनाभावी स उपाधिर्यदत्ययइति अहं यात्तिकं च समासमाविना
भावावकाशास्ताय यदा तदा सोपन पादिनो व्याप्तस्तपो हीनोऽप्रयोजकः व्याप्यस्य लक्षणमुक्त्वा व्यापकस्य लक्षणमाह येनेवेति
किंचज्ञानज्ञेययोरविनाभावात् ज्ञेयग्रहणे ज्ञानोपलक्षणार्थमित्याह॰ लिंगत्वं गम्यत्वेन चेति तेनैतासिद्धमित्याह॰ धूमादि ५

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

धीयत इत्यादि किं च साध्यधर्मविशिष्टो धर्मी पक्षस्तत्र व्याप्यवृत्तित्वं हेतोः पक्षधर्मत्वमिति तत्सिद्ध्यर्थं लिंगशब्दावर्त्तनानुस
त्तिः कर्तव्येत्याह लिंगिग्रहणमिति लिंगिशब्दः अर्थाग्रहणेऽनेनेति कृत्वा तद्ग्रहणं कुत्र [illegible]
[illegible] सा ऊहनीय इत्यर्थः यस्मादेवं तदित्युपसंहारः व्याप्यत्यादि लक्षणं अथवा इतीत्यारभ्य प्रकृते फलितं दर्शनं तद्विद्वित ते
दनुमानमिति संबंधः तन्त्रांतरलक्षितानिति तन्त्रांतरे न्यायदर्शने लक्षितान् अक्षपादाचार्येन तत्पूर्वकं त्रिविधमनुमानं पूर्वव
त् शेषवत् सामान्यतो दृष्टं चेति शास्त्रांतरोक्तानीत्यर्थः ननु शास्त्रांतरलक्षितानामनुमानविशेषाणां स्वशास्त्रे किमित्यादरमि
त्याशंक्य परमतमप्रतिषिद्धमनुमतं भवतीति न्यायादित्याह अभिमतानिति तत्रैवं त्रैविध्ये सति प्रथमं चादित एवानुमानसा
मान्यं द्विधा वीतमवीतं च वीतस्य लक्षणमाह ऽन्वयमुखेनेति विधायकं वीतमित्युक्ते निषेधविधायकेऽप्यवीते अतिव्याप्तिस्त।
द्व्युदासार्थं प्रवर्त्तमानमिति विशेषणं तथापि तत्रैवातिव्याप्तिस्तद्व्युदासार्थमन्वयमुखेनेति अन्वयेनेत्यादि लक्षणमस्तु मुखश
ब्दस्यानर्थक्यमिति चेन्न तथा सति केवलान्वयिन एव वीतत्वं स्यान्न त्वन्वयव्यतिरेकिणस्तद्व्युदासार्थं तन्मुखेनेति अन्वयमुखे
न अन्वयप्रधानेन केवलं प्रवर्त्तते न तु व्यतिरेको नास्तीति भावः अवीतस्य लक्षणमाह व्यतिरेकमुखेनेति निषेधकमवीतमित्युक्ते
विमतावर्णाः क्षणिका न भवंतीति तदेवीते प्रत्यभिज्ञाप्रमाणत्वात् संप्रतिपन्नवदिति वीतेऽतिव्याप्तिस्तद्व्युदासार्थमुक्तं प्रवर्त्तमानमि
ति तत्रैवातिव्याप्तिपरिहारार्थं व्यतिरेकमुखेनेति व्यतिरेकेणेत्यादि लक्षणे अन्वयव्यतिरेकिरूपे वीतेऽतिव्याप्तिस्तन्निरासाय मुख
नेति तन्निरासः एवं च सामान्यतोदृष्टं वीतमित्यग्रे अभिधास्यत इदानीमवीतं शेषवदित्याह तत्रेति शेषवतो व्युत्पत्तिकथनेनैव
शेषविषयं शेषवदिति लक्षणमाह शिष्यत इत्यादिना उक्तव्युत्पत्तौ संमतिपत्तिमाह यथाहुरिति अग्रेऽभिधास्यत इति असत्कृ

अवीतं व्यतिरेक[illegible] प्रधानेन प्रवर्त्तते अन्वयव्यतिरेकिरूपं त्वन्वयमुखेन स्यान्न तु व्यतिरेकमुखेनेति २

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

सां·कौ·टी· ६

6

रणादित्यत्राकारणभावाच्चेत्यनेनेत्यर्थः दृष्टस्वलक्षणसामान्यविषयं यदिति दृष्टस्वलक्षणशब्दः सामान्यतो दृष्टाद्व्यवच्छेदार्थः
यद्द्विविधं वीतं तस्य मध्ये पूर्ववत्तद्वल्लक्षणाक्रान्तमित्यर्थः विषयं पूर्ववदित्युक्ते साकांक्षवचनमनर्थकं स्यात् तद्व्युदासार्थ
मुक्तं सामान्येति सामान्यतो दृष्टेति व्याप्तिपरिहारार्थमुक्तं दृष्टस्वलक्षणेति लक्षणमुपलक्षणं वा स्वलक्षणं संभावयति पूर्वमित्यादि
ना पूर्वमित्यस्य व्याख्यानं प्रसिद्धमिति प्रसिद्धमित्यस्य तात्पर्यकथनं दृष्टेत्यादि अग्नित्वसामान्यविशेष इत्यादि सामान्यं हि द्विविधं
परमपरं च अनुवृत्तिप्रत्ययकारणं तत्र परं सत्ता महाविषयत्वात् सा चानुवृत्तेरेव हेतुत्वात् सामान्यमेव द्रव्यत्वाद्यपरमल्पविषयत्वात्
तच्च व्यावृत्तेरपि हेतुत्वात् सामान्यं सद्विशेषाख्यामपि लभते इति प्रशस्तदेवेनोक्तम् अवान्तरसामान्यरूपसामान्यविशेषत्वमित्य
र्थः । अदृष्टेति न दृष्टं स्वलक्षणं यस्य तददृष्टस्वलक्षणं अदृष्टलक्षणं च तत्सामान्यं चेति अदृष्टस्वलक्षणसामान्यं तद्विष
यो यस्य तददृष्टस्वलक्षणसामान्यविषयं सामान्यतो दृष्टमित्यर्थः तस्योदाहरणमाह · यथेति अत्रेन्द्रियानुमाने एतल्ल
क्षणं कथं सिद्ध्यतीत्याशंक्याह - अत्र हीति रूपादिज्ञानानि करणपूर्वकाणि क्रियात्वाच्छिदादिक्रियावदित्युक्ते न च सि
अनुमाने छिदादौ वास्यादेः करणविशेषस्य दृष्टत्वात् तद्दृष्टेत्यादि लक्षणसंभव इत्याशंक्याह यद्यपि [illegible] चेति किंजातीयं तत्करणमि
त्यपेक्षायामाह इन्द्रियेति ततः किमित्याह न चेति व्यतिरेकोदाहरणमाह यथे[illegible]ति ननु पूर्ववत्सामान्यतो दृष्टाद्भिन्नमेव न भवतीत्यवी
तत्वाविशेषादित्याह सोयमिति अनन्तरोक्त इत्यर्थः ननु लक्षणेऽदृष्टपदं लक्षणे च दृष्टपदमिति परस्परव्याघातोक्तौ लक्षणसंबंध
इत्याशंक्य लक्षणमुपलक्षणं वा परिहरति अत्र च दृष्टमिति अनुमानशब्दयोः पूर्वापरभावे कारणमाह शाब्देति प्रयोज्यवृद्धो मध्यम
वृद्धास्तेषां प्रवृत्तिहेतुं यस्य ज्ञानस्य तत्तेन ज्ञानेन यदनुमानं तत्पूर्वकत्वाच्छब्दार्थसंबंधग्रहणस्येति अयमर्थः विमतः शाब्दः ६

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

कंबंधवदुभयोरपि संयोग इत्यनेन अर्थेनेन योग अग्रतः पुरुषस्य अन्योन्यापेक्षत्वेनेन समुदायादि त्यनेन चगुणानां विशेषवचने रंगोमिलत्
त्तिः अकर्तृभावक्षेत्र गत्राकृते त्वं पुरुषस्य विपर्ययाशक्ति तुष्टि सिद्ध्याख्या इत्यारभ्य विपर्ययादयः पदार्थाः षष्टिपदार्थाः कथिताः स्व
तारति प्रकृतिर्महानहंकारश्च शब्दतन्मात्रं स्पर्शतन्मात्रं रूपतन्मात्रं षोडशगणो विकारः पुरुषः प्रकृते महानित्यनेन दर्शितो
विपर्ययः पंचविधः अविद्यास्मितारागद्वेषाभिनिवेशाः क्लेशाः तमोमोहमहामोहतामिस्रोधतामिस्रा तापराभिधाना उक्ता इति
शेषः पंचविपर्ययभेदाः इत्यनेनोद्दिष्टः भेदस्तमसोऽष्टविध इत्यनेन विशेष उक्तः तयोक्तो नव चतुष्टयः इति इति प्रकृत्याख्या उपा
दानाख्या कालाख्या भाग्याख्या ततश्चांभः सलिलं ओघमहौघा परनामिका आध्यात्मिका अपरा पंच बाह्या पारं सुपारं पारपारः अनुत्त
मांभ उत्तमाम्भ इति नव तुष्टयो आध्यात्मिका इत्यनेन प्रदर्शिताः करणानां असामर्थ्यमिति बाधिर्यकुष्ठिता अंधत्वं जडता अजिघ्रता प
मूकता ६ कौण्य ७ पंगुत्वं ८ क्लैब्यं ९ उदावर्तता १० मत्तता ११ तुष्टि प्रकृत्याख्या वैकल्यं १२ उपादानाख्या वैकल्यं १३ भागाख्या वैकल्यं १४
क. ६ पारवै १५ सपारवै १६ अनुत्तमाम्भवै १७ उत्तमाम्भवै १८ तारवैकल्यं सुतारवैकल्यं २० तारतारवैकल्यं २१ रम्यकवै २२ सदामुदितवैकल्यं २३ प्रमोदवै
कल्यं २४ मुदितवैकल्यं २५ मोदमानवैकल्यं २६ एकादशेन्द्रियवधाभ्यां साकं गृहीतमिति षष्टिपदार्थीयमष्टभिः सह सिद्धिभिरिति
अध्ययनभावनाभावं आध्यात्मिकं दुःखविघातमिति प्रतिमार्थकः आधिभौतिकोदुःखविघातो मुदितइति नामांतरं आधिदैविक
दुःखविघातो मोदमानसंज्ञांतरमित्यष्टौ सिद्धयः आभिः सह पूर्वोक्ता एकपंचाशदाः समाहाराः षष्टिपदार्था राजवार्तिके प्रतिपादिते ति
कवाचस्पतेः सूक्तिः कंचमंदस्य मेमतिः कृत्याधिसंमतं तत्त्वमितिशोध्यं सुमनीषिभिः ॥ ॥ इति श्रीबोधारण्यपतिशिष्यश्रीमा
रतीनामकपतिकृता तत्त्वकौमुदीव्याख्या समाप्ता ॥ ६ ॥ लिपीकृतं गमानीरामेणाम्रतसरसि ॥ स्वात्मार्थं प्रतिपद्यम

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

लिखतं देवीदास राम्परवाला आगे पुस्तक सांख्य तत्त्व कौमुदी आ सां. त. टीका गंगाधर दत्तनु १।।५ दीया मङ्गल मिति भादो वदी १३ साल १८ ९६

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative